मार्कण्डेय: २०६,१३ । ४४७,११,२० । ४६०,१० ।

मिहिर: ७१८,१७ ।

मुद्गल: २४६ १८ ।

मेधातिथि: ७६५,१३ ।

## य

यज्ञपार्श्व: २७२,१६ ।

यम: ६५,१६ । ४६१,५ । ४६१,२० । ४६४,१२ । ४६७,३ । ५००,७ । ५०५,११ । ५२२,१८ ' ५२६,१७ । ५३०,६ । ६७५,८ । ७१६,६ । ७२७,७ । ७६३,११ ।

याज्ञवल्क्य: २३,१४ । ३०,१७ । ३३,४ । ५४,४ । ६२,३ । २४३,१ । ३०८,५ । ४७०,३ । ४८२,४,२० । ४६७,१६ । ५०५,१ । ५०७,१४ । ५१७,६ । ५१८,२ । ५२१,२ । ५२३,४ । ५३१,१४ । ५५१,१ । ६६४,१४ । ६८५,१६ । ७१७,४ । ७२२,३ । ७५६,१८ । ७५८,१५ । ७६३,१५ ।

योगीश्वर: ५०३,१७ ।

## र

राघवभट्ट: २७३,१७ ।

राजमार्त्तण्ड: ४६३,८ । ४७२,६ । ४७४,१६ । ४७७,१६ ।

## ल

लल्ल: ४७८,१६ । ७३६,८ । ७४०,६ । ७४२,१ । ७५५,५ ।

लिङ्गातु: ४६२,४ ।

लौगाक्षि: ४४६,७ । ६६६,१३ ।

व्यास: २४९,१४,८ । २६८,३ । ३०६,५ । ४४३,१ । ४७५,७ ।
४८१,९ । ४९५,२० । ५१०,३ । ५१५,११ । ५१६,१,१७ ।
५१९,१९ । ५२२,१५ ।

## श

शङ्ख: २७३,६ । ४४५,११ । ४४६,९ । ४८३,८ ।
शातातप: ९४,६ । २०१,१० । ४८९,१ । ५०५,१४ । ५०७,२० ।
६७६,१६ । ६९१,१२ । ६९५,५ । ७२४,१४ ।
शालङ्कायन: ४४५,१४ ।
शौनक: ६७,१७ । ९७,१८ । २३९,९ । ४२६,५ । ४८१,६ ।
४८४,१ । ४८७,१८ । ५०९,११ । ५३५,७ । ६५३,१० ।
६६९,५ । ६७१,१ । ७२८,११ । ७५७,१८ ।
शौनकेय: २२०,१२ ।
श्रीधर: २७०,१ । ३०९,३ । ४३२,७ । ४३७,८ । ४४२,८ ।
४४३,५ । ४४६,१७ । ४६४,८ ।
श्रीनृसिंह: ४३२,१४ ।
श्रीपति: ४३१,१४ । ४७८,४ । ७३९,३ । ७५३,७ । ७५४,११ ।

## स

संवर्त्त: ५४,९ । ४९५,१२ । ७२९,१५ ।
सत्यव्रत: ९८,४ ।
सत्याषाढ़: ६९७,४ ।
सुदर्शनभाष्यकार: ४७०,१५ ।
सुमन्तु: ७२४,१२ ।

## र

रत्नकोष: २४४,११ । ७५१,१२ ।

रत्नमाला ३१२,७ । ५२०,११ ।

रत्नसङ्ग्रह: ४७३,१७ । ४७४,३ ।

रामवाजपेयं ६४७,१ ।

## ल

लक्षणसङ्ग्रह: ६४६,१० ।

लिङ्गवाग्भिष्टम् २०५,१२ ।

लुब्धजातकम् ४५९,१ ।

लैङ्गम् (लिङ्गपुराणम्) ७१६,११ ।

## व

वराहसंहिता ४२,२ । ७३१,१४ ।

वशिष्ठसंहिता ३२४,२ । ६८५,२ ।

वाक्यसार: ४८०,५ ।

वाजसनेयकम् १५,१८ ।

वायुपुराणम् ४९९,११ । ५१५,२० ।

विधानमाला १७१,१७ । २५१,५ । ४२२,१४ । ४३४,६ ।
७६४,८ । ७७०,१ ।

विश्वरूपनिबन्ध: ६९७,७ ।

विद्यादर्श: ९६,१ । ७०८,१ ।

कालमानादिकं कुर्य्यादनुज्ञातो द्विजातिभिः।
उद्धृत्य सपिधानन्तु कलसं हैमपूरितम्॥
पद्मासनसमाविष्टो नमस्कुर्य्यात्प्रयत्नतः।
पश्चात्प्रजापतिरिति ब्रूयुः प्रयतमानसाः॥
पुण्याहं वाचयिष्येऽहमिति वाचयिता वदेत्।
वाच्यतामिति भाषन्ते वक्तारश्च सुतेजसः॥
प्रथो जाते च शकुने सामगायसि-पूर्व्वकम्।
ऋचं सर्व्वे सह ब्रूयुस्ततो वाचयिता द्विजः॥
प्रोमुक्तिपूर्व्वं पुण्याहं भवन्त इति भाषते।
परे ब्रुवन्त्विति ब्रूयुरों पुण्याहमितीतरे॥
पुनरप्येवमेव द्विः कृत्वा पुण्याहवाचनम्।
ततः स्वस्ति न इन्द्रेति* ऋचं ब्रूयुः सहोभये॥
ततो वाचयिता पूर्व्वमों स्वस्तीत्यभिधाय तु।
पश्चाद्भवन्त इति च ब्रुवन्त्विति प्रभाषते॥
ॐ स्वस्तीति तथैवान्ये प्रतिब्रूयुस्ततः परम्।
प्रारिप्सितं चतुर्थ्योक्ता कर्म्म वाचयिता ततः॥
प्रारा.स्तीत्याद्यं ब्रुवन्नेव† पूर्व्ववत्समुदीरयेत्।
गर्भा... चतुर्थ्यन्त-तत्तत्कर्म्मोक्तिपूर्व्वकम्॥
वदेत्पूर्व्वं ... च प्रतिब्रूयुरथ सर्व्वेऽपि ते द्विजाः।

---

* प्र... श्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्ट-
नि... धातु। (२५अ. १८म. यजुः।)

† तिन...

‡ युग... पाठः।

स्वस्तिवाचनमेतत्तु सर्व्वेषामृद्धिकर्म्मणाम् ।
आदावन्ते च कर्त्तव्यमिति यज्ञविदो विदुः ॥
इति शौनकीये पुण्याहवाचनम् ।

ोगपारिजाते हारीतेनात्र विशेष उक्तः ।
पुण्याहवाचनं पूर्व्वं सङ्कारं ब्राह्मणस्य च ।
तदेव च निरोङ्कारं कुर्य्यात्क्षत्त्रियवैश्ययोः ॥

पारिजाते यमः ।

नीकृतजानुमण्डल इत्यादि हेमाद्रिग्रन्थोक्तं सर्व्वकर्म्मसाधारणं
ाहवाचनम् । तथाच शौनकीये ।

पुण्याहवाचनविधिं वक्ष्यामोऽथ यथाविधि ।
योक्तव्यः* कर्म्मणामादौ अन्ते चोदयसिद्धये ॥
अर्च्चिता ब्राह्मणाः पूर्व्वं गन्धमाल्यैः सदक्षिणैः ।
तिष्ठेयुः प्राङ्मुखा युग्मा वक्तारो दर्भपाणयः ॥
उदङ्मुखो वाचयिता तिष्ठेदेभ्यश्च† दक्षिणे ।
बिभ्रत्पूर्णमपां कुम्भं पिहिताननमर्च्चितम् ॥
तत्रादावाप इत्येवं वदेद्वाचयिता ततः ।
प्रा[illegible]ोऽपि शिवा आपः सन्त्वित्येवं ब्रुवन्त्यथ ॥
गन्धा[illegible]ति वदेदेकः सुमङ्गल्यमितीतरे‡ ।
वदेत्पूर्व्वं [illegible]नस इत्येवमपरेऽपि च ॥

---

* प्र[illegible] इति ख-पुस्तके पाठः ।

† ति[illegible]श्च इति ग-पुस्तके पाठः ।

‡ सु[illegible]ः पाश्चितीतरे इति ख-पुस्तके पाठः ।

सोमोऽददद्दित्येताभिः* प्रत्यृचं पञ्चभिस्तथा ।
पायसं तत्र साज्यञ्च शतसंख्यञ्च होमयेत् ॥
प्रजापते न त्वदेता†मीत्युद्दिश्य प्रजापतिम् ।
ततः स्विष्टकृतं हुत्वा होमशेषं समापयेत् ॥
ब्राह्मणानां सपिण्डेषु कर्त्तव्यः पुत्त्रसङ्ग्रहः ।
तदभावेऽसपिण्डेषु अन्यत्र तु न कारयेत्‡ ॥
क्षत्त्रियाणां स्वजातौ वा गुरुगोत्रे समेऽपि वा ।
वैश्यानां वैश्यजातौ वा शूद्राणां शूद्रजातिषु ॥
सर्व्वेषाञ्चैव वर्णानां जातिष्वेव च नान्यथा ।
दौहित्रं भागिनेयं वा शूद्रानाञ्च पतिर्यदि ॥
नैकपुत्त्रेण कर्त्तव्यं पुत्त्रदानं कदाचन ।
बहुपुत्त्रेण कर्त्तव्यं पुत्त्रदानं प्रयत्नतः ॥
दक्षिणां गुरवे दद्याद्यथाशक्ति द्विजोत्तमः ।
नृपो राष्ट्रार्द्धमेवापि§ वैश्यो वित्तशतत्रयम् ।
शूद्रः सर्व्वस्वमेवापि अशक्तश्चेद्यथाबलम् ॥

---

* सोमोऽददद्गन्धर्व्वाय गन्धर्व्वोऽददद्ग्नये ।
रयिं च पुत्त्रांश्चाददद्ग्निर्मह्यमथो इमाम् ॥ (१०म. ८५सू. ४१ऋक् ।)

† प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् ॥ (१०म. १२१सू. १०ऋक् ।)

‡ अन्यत्र तु न कारयेदित्यनेन ब्राह्मणातिरिक्तः क्षत्त्रियादिसमानजातीयो दत्तको व्यावर्त्यते इति दत्तकचन्द्रिका ।

§ राष्ट्रार्द्धमङ्गराज्योत्पन्नमेकवर्षीयद्रव्यं प्रदद्यादङ्गराज्योत्पन्नमेकवर्षार्जितं धनमिति वचनात् ।
इति दत्तकचन्द्रिका ।

अथ महान्तोऽयुतहोम-लक्षहोम-कोटिहोमा उच्यन्ते ।

हेमाद्रावेव मात्स्ये ।

राज्ञा धर्म्मप्रसक्तेन प्रजानाञ्च हितेप्सुना ।
ग्रहयज्ञ: सदा कार्य्यो लक्षहोमसमन्वित: ॥
नदीनां सङ्गमे चैव सुराणामग्रतस्तथा ।
सुसमे भूमिभागे च देवताधिष्ठिते नृप ॥
गुरुणा ऋत्विजा चैव सार्द्धं भूमिं परीक्षयेत् ।
खनेद्दै तत्र कुण्डञ्च सुसमं हस्तमात्रकम् ॥
द्विगुणं लक्षहोमे च कोटिहोमे चतुर्गुणम् ।
ऋत्विजो युग्मशः प्रोक्ता अष्टौ ते वेदपारगाः ।
कन्दमूलफलाहारा दधिक्षीराशिनोऽपि वा ॥
वेद्यां निधापयेच्चैव रत्नानि विविधानि च ।
कुण्डस्यपरिधेयाश्च ततोऽग्निञ्च समर्चयेत् ॥

ऋचापि यज्ञाः परिधेयाः प्रणीता इत्यर्थः ।

गायत्र्या दशसाहस्रं मा नः स्तोकेति* षड्गुणाः ।
त्र्यम्बकादिमन्त्रेण चत्वार्य्येव तु वैष्णवे: ॥
कुशाग्रैर्जुहुयात्पञ्च किरिकाभि:(किरिकायां) तु षोडश ।
होतव्या दशसाहस्रा षष्ठो वै जातवेदसा† ॥

* मा नः स्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान् मा नो रुद्र भामितो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥ (१६अ. १६म. यजुः ।)

† जातवेदसे सुनवाम सोममित्यादिकेन ६२ पृष्ठे प्रदर्शितेन ।

ऐन्द्रवारुणवाह्नेयवायुसौम्यैः सवैष्णवैः।
होमं शतसहस्रन्तु अष्टोत्कृष्टं* विधीयते॥
सर्व्वपीडाविनाशाय कोटिहोमः शुभावहः।
यवव्रीहिघृतक्षीरतिलकङ्गुप्रसाधिताः।
पङ्कजोशीरबिल्वाम्रदला होमे प्रकीर्त्तिताः॥
सर्व्वशास्त्रार्थकुशलैर्ब्रह्मात्मप्रपूजकैः।
होमः कार्य्यः सदा विप्रैः सर्व्वशान्तिप्रदायकः॥
ग्रहकृत्योपसर्गादि ऋतुनागभयाशुभाः(भम्)।
यत्नरक्षःकृता पीडा लक्षहोमात्प्रशाम्यति॥

ब्रह्मोवाच।

सर्व्वलोकोपकाराय सङ्क्षेपान्न तु विस्तरात्।
लक्षहोमं प्रवक्ष्यामि यथा प्रोक्तन्तु शम्भुना॥
भूमिकम्पे दिशां दाहे ग्रहयुद्ध उपस्थिते।
केतुसन्दर्शने चैव आदित्यस्य च कम्पने॥
कृष्णवर्णे तथा सूर्य्ये तथा छिद्रसमन्विते।
रक्तवृष्टिस्तथा नद्यो विपरीता वहन्ति वै॥
निर्घातं गगनोद्भूतं वारिमध्ये वह्निच्छला।
उपसर्गास्तथा लोके राज्ञां तु भयकारकाः॥
यस्य राशौ ग्रहाः पञ्च षष्ठ सप्त सुराधिपाः।
ग्रहणं चन्द्रसूर्य्यस्य षष्ठेवाष्टमसंस्थितेः॥

* षष्टोत्कृष्टमष्टाधिकम्।

घृतार्च्चिषि अग्नौ ।

एक एव भवेद्‌यत्र: कोटिहोमो न संशय: ।

एवं य: क्रियते क्षिप्रं व्याकुलै: कार्य्यगौरवात् ।

शतानन: स विज्ञेय: कोटिहोमो मखोत्तम: ॥

अत्र सर्व्वापि इतिकर्त्तव्यता पूर्व्ववत् । कुण्डानां हस्तसम्मितमिति हस्तमात्रता तु घृतार्च्चिषि नियोजिते इत्युक्तत्वाद्‌घृतादिमौत्रदाज्यहोमद्रव्यविषया । तिलादौ तु शतांशस्य लक्षत्वेन लक्षहोमोक्तं कुण्डं कार्य्यम् ।

तदुक्तम् ।

अयुते त्वथ होतव्ये कुण्डं स्याद्धस्तमात्रकम् ।

द्विगुणं लक्षहोमे तु कोटिहोमे चतुर्गुणम् ॥

इति प्राक् । अर्थात् परिमाणमिति कात्यायनपरिभाषोक्ते: स्वतन्त्रस्य ईदृशस्य च लक्षहोमस्य अविशेषाच्च । अत्र सहस्रब्राह्मणसंख्या ऋत्विग्मात्रविषया । ऋत्विगाचार्य्यसहित इति पूर्व्वोक्तस्याचार्य्यस्य विशेषाभिधाने बाधकाभावात् । तेन आचार्य्येण एकस्मिन् कुण्डे अग्नौ प्रणीते सति तमग्निमन्येषु कुण्डेषु विहृत्य प्रतिकुण्डं दश दश ऋत्विजो जुहुयुरिति शतमुख: ।

अथ दशमुख: ।

तत्रैव ।

स्वल्पैरहोभि: कार्य्य: स्याद्वर्षाकालादिकेऽपि वा ।

तदा दशमुख: कार्य्य: कोटिहोमो महामते(विजानता)

वशिष्ठसंहितायाञ्च कुण्डलक्षणमीरितम् ।
गृहस्येशानभागे च मण्डपं कारयेद्बुधः ।
षड्द्वादशाष्टभिर्हस्तैः* षोडशैर्वा समन्ततः ॥

---

विस्तारार्द्धेन निम्नं स्यादन्यभागेऽथ निम्नयः ।
भागेऽन्तिमे भवेद्ग्रीवा दैर्घ्यार्द्धेन च विस्तृता ॥
तस्या मुखं हंसमुखं हस्त्यग्रमुखमेव वा ।
बिलात्प्रणालिका तावत्पर्य्यन्तमार्यानुकल्पतः ॥
कर्णौ समुच्छ्रितौ ग्रीवापार्श्वयोरुदितौ तथा ।
बिलस्य बुध्नं पद्मं स्यादथ दण्डस्य लक्षणम् ॥
चतुर्विंशत्तयो द्वौ वा भागौ दण्ड इतीरितः ।
तस्य मूलं भवेत् स्थूलः परिणाहो नवाङ्गुलः ॥
अन्ते पञ्चाङ्गुलः स्थूलो यत्नतो वर्तुलो भवेत् ।
दण्ड एव स्रुचा काकपुच्छत्वं समुदीरितम् ॥
यथाशोभं स्रुचः कार्य्या इति बौधायनोऽब्रवीत् ।
आस्यान्तरात् वितस्त्यं निम्नमास्यमेव यत् ॥
प्रादेशमात्रतापि स्याद्दैर्घ्यमन्यमतादितः ।
दण्डो भागद्वयेन स्यात्पात्रं भागद्वयेन च ॥
ऊर्द्ध्वमेकेन भागेन ग्रीवा चेति यथाक्रमः ।
स्रुचः सह स्रुवेण स्युरुक्तलक्षणा यथापि वा ॥

अन्यमतन्तु स्रुवमेवमाह—

षडङ्गुलमितच्छिद्रः सुवृत्तश्चाङ्गुलप्रथवान् ।
चतुरस्रपर्णको यद्वा दलं तस्याग्रपुष्करम् ॥
आयामं पञ्चधा कृत्वा त्रिभागं दण्डमेव च ।
द्विभागं पुष्करं प्रोक्तं दण्डं लक्षणमुत्तमम् ॥

* द्वादशाष्टभिर्हस्तैरिति ग-पुस्तके पाठः ।

एकाब्दिके तु विधवा भवतीह कन्या
नयनान्तरे तु सुभगं प्रथुमेतरोधे॥ इति।

अन्यच्च।

भ्रातृयुग्मे स्वसृयुग्मे भ्रातृस्वसृयुगे तथा*।
न जातु मङ्गलं कुर्य्यादेकस्मिन् मण्डपेऽहनि॥
एकस्मिन् वत्सरे प्राप्ते न कुर्य्याद्द्वयमजातयोः।
चौरश्चैव विवाहञ्च मौञ्जीबन्धनमेव च॥

यत्तु† नारदः।

पुत्रीपरिणयादूर्द्धं यावद्दिनचतुष्टयम्।
पुत्रान्तरस्य कुर्व्वीत नोद्वाहमिति सूरयः॥

तदभिन्नमातृविषयम्।

विवाहस्त्वेकजातानां षण्मासाभ्यन्तरे यदि।
वर्षत्रयं त्रिभिर्वर्षैस्तत्रैका विधवा भवेत्॥

इति वराहसंहितायां विशेषोक्तेः।

तथा।

नैवैकजन्मनोः पुंसोरेकजन्ये तु कन्यके।
नैवं कदाचिदुद्वाहो नैकदा मुण्डनद्वयम्॥
एकजन्ये तु कन्ये द्वे पुत्रयोर्नैकजन्मयोः।
न पुत्रीद्वयमेकस्मै प्रदद्याच्च कदाचन॥ इति।

इयञ्च भिन्नमातृकयोः पुत्रयोः पुत्र्योर्वा एकस्य विवाहोप-

---

* भ्रातृस्वसोश्च युग्मके इति संस्काररत्नमालायां पाठः।

† यत्तु प्रथम महदे तु इति संस्काररत्नमालायां पाठः।

ब्राह्मञ्च वैष्णवञ्चैव चादित्यं नारदं तथा ॥
मार्कण्डेयमथाग्नेयं कौर्म्मं वामनमेव च ।
गारुड़ं (लि)लैङ्गमाख्यानं(तं) तथा भागवतं स्मृतम् ॥
वाराहं ब्रह्मवैवर्त्तं शकुनेषु प्रशस्यते ।
विमुच्य पुस्तके रज्जुं पीठे (पटे) निक्षिप्य संस्थिते ॥
धौतवस्त्रधरः स्नात्वा कुशहस्तो द्विजोत्तमः* ।
आदावाचामनमभ्यर्च्च कृत्वा सङ्कल्पमेव च ॥
अङ्कुशञ्चाक्षसूत्रञ्च पाशं पुस्तकमेव च ।
धारयन्तीं सितां ध्यायेत्प्रसन्नास्यां सरस्वतीम् ॥
गोक्षीरसदृशाकारं त्रिनेत्रं वृषवाहनम् ।
प्रसन्नवदनं शान्तं शुक्लाम्बरधरं हरम् ॥
हरिञ्च देवदेवेशं स्तूयमानं पुराणकैः ।
ध्यात्वैवं पूजकः सम्यगादौ पूजां समारभेत् ॥
आपो वा इति मन्त्रेण कलशस्याभिमन्त्रणम् ।
तज्जलन्तु गृहीत्वाथ पूजाद्रव्याण्यथास्पृशेत् ॥
तत्सद्ब्रह्मेति मन्त्रेण प्रणव(स्त) प्रणवेन तु ।
आत्मानं सर्व्वपात्राणि तत आवाहयेदिति ॥
यद्वागिति मन्त्रेणैव भारतीषोडशार्च्चनम् ।
पुरुषसूक्तेन वा कुर्य्यात् पुस्तके षोडशार्च्चनम्† ॥

---

* शुचिरक्रोधनोऽत्वरः इति पद्मपुराणे पाठः ।

† गायत्र्या वा समर्च्चयेदिति पद्मपुराणे पाठः ।

प्रत्यर्कपरिविषेन्द्रचापाभ्रध्वनयो यदि ।

दोषाय मङ्गले नूनमदोषाय च कालजाः ॥ इति ।

तथा ।

पौषादि चतुरो मासान् (प्रोक्ता) ज्ञेया ह्यष्टिरकालजा ।

अन्योऽपि ।

निर्घात*भूमिचलने ग्रहयुद्धे तमोद्गमे ।

षष्ठमे पञ्चदिवसमन्यच्चैकदिनं (तथा) त्यजेत् ।

दुःस्वप्ने दुर्निमित्तादौ न कदापिच्छुभं भवेत् ॥ इति ।

तथा ।

भूकम्पादेर्न दोषोऽस्ति हविश्राद्धे कृते सति ।

ततः पूर्व्वन्तोक्तदोष इति ज्योतिर्विदो विदुः ॥

अन्यत्रापि ।

त्याज्याः सूर्य्यस्य संक्रान्तौ पूर्व्वतः परतस्तथा ।

विवाहादिषु कार्य्येषु नाड्यः षोडश षोडश ॥ इति ।

विषुवतोरयनयोर्दिनत्रयं

हरिपदेषु षडशीतिमुखेषु ।

पूर्व्वतोऽपि परतोऽपि संक्रमा-

न्नाडिकाश्च खलु षोडशेति च ॥

---

*यदान्तरिक्षे पवनात् जायते नभसागतः ।

पतनाच्च क्षितिर्घातो जायते वायुसम्भवः ॥

इत्युक्तलक्षणे ।

